Ramakrishnacharitam Gadyapadyatmakam

# रामकृष्णचरितम् गद्यपद्यात्मकम्

## Document Information

Text title : Ramakrishnacharitam Gadyapadyatmakam

File name : rAmakRRiShNacharitamgadyapadyAtmakaM.itx

Category : vishhnu, vAsudevAnanda-sarasvatI, gadyam, krishna

Location : doc_vishhnu

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# रामकृष्णचरितम् गद्यपद्यात्मकम्

पृथिवीभरपरिहृत्यै सुरवरसम्प्रार्थितोऽत्र भूमितले ।
नृरूपेण तमोनुद्वंशे सकलोऽप्यवातरद्विमले ॥ १॥

पितृबन्धमोचकोऽभूद्यः स्वोत्पत्त्या प्रदर्श्य निजरूपम् ।
प्राक्स्मृत्यै स पितृभ्यां तदनुमतं स्वीचकार सद्रूपम् ॥ २॥

नीता गुरुणान्यत्र च देवरिपून्हन्तुकाम एव पुरा ।
स्त्रीवधरूपां गणपतिपूजां चक्रे बभूव साऽपि वरा ॥ ३॥

शेषसहायो हतवानसुरान्यज्ञद्रुहो महावीरः ।
स्वमतं ततान यज्ञं द्विजदारानुद्दधार वरधीरः ॥ ४॥

(गद्यम्)अथ स भगवान् क्षत्ररूपेणावतीर्णस्तमोऽनुत्कुलभूषणो विप्रवरेण नीतो निजपूर्वपत्नीपरिणयं चिकीर्षुर्न केनाप्युत्थापितं न नमितं च राजाभिमानचापं लीलयैवादाय सहसैव बभञ्ज ॥ ५॥

कुमारशापेन वैकुण्ठादपि पतितं नीचतां गतमात्मानं वृणानं राजानं समागतमालोच्य पूर्वं म्लायितवदनापि पद्मसदना हृष्टवदना सती स्वयमेव स्वपतिं वृतवती ॥ ६॥

वव्रे श्रियं स विजयश्रिया स्वभागं जहार मृगप इव ।
हृष्टभ्रातयुतः स प्रतस्थ ईशः प्रभुः कृतार्थ इव ॥ ७॥

(गद्यम्)अथ ससैन्यकः सभ्रातृकः सपरिग्रहो भगवान् स्वराष्ट्रं प्रयास्यन्मेघगम्भीरया वाचा गर्जन्तं पृष्ठत आगतं द्विषन्तं निर्जित्य विजयी सन्स्वनगरं प्राविशत् ॥ ८॥

ईदृग्गुणा यस्य न वर्णितुं यान् शेषोऽपि शक्तः क कथा परेषाम् ।
स बद्धसेतुर्जितदेववैरिर्नाथो रघूणामथवा यदूनाम ॥ ९॥

इति श्रीवासुदेवानन्दसरस्वतीविरचितं श्रीरामकृष्णचरितं सम्पूर्णम् ।

*Ramakrishnacharitam Gadyapadyatmakam*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*